# द्वादशः पाठः

## मनोर्मन्थनम्

भारतीयसामाजिकसुव्यवस्थायां स्मृतिग्रन्थानां महत्त्वपूर्णं योगदानमस्ति। प्रमुखस्मृतयः अष्टादशः सन्ति। तासु मनुस्मृतिः महत्त्वपूर्णा। इयं महर्षेः मनोः रचना मन्यते। प्राचीनकालादेवास्याः प्रभावो समाजोपरि दृश्यते। इयं भारतीयसामाजिकसंरचनायाः आधारभूता। स्मृतिग्रन्थोऽयं नैतिक-राजनैतिक-धार्मिक-सांस्कृतिकादीनां नियमानां भाण्डागारः।

पाठेऽस्मिन् मनुस्मृतेः सङ्कलितेषु श्लोकेषु जीवनोपयोगिनी सर्वविधकल्याणकारिणी शिक्षा समाहिता।

**एकाक्षरं परं ब्रह्म प्राणायामाः परं तपः।**
**सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते।।1।।**

**अन्वयः** - एकाक्षरं परं ब्रह्म प्राणायामाः परं तपः सावित्र्याः परं नास्ति, तु मौनात् सत्यं विशिष्यते।

**शब्दार्थः** - सावित्र्याः - सूर्यस्य (सूर्य का)

**सूर्येण ह्यभिनिम्लुक्तः शयानोऽभ्युदितश्च यः।**
**प्रायश्चित्तमकुर्वाणो युक्तः स्यान्महतैनसा।।2।।**

**अन्वयः** - यः सूर्येण अभिनिम्लुक्तः अभ्युदितः च शयानः प्रायश्चित्तम् अकुर्वाणः महता युक्तः एनसा स्यात्।

**शब्दार्थौ** - अभिनिम्लुक्तः - अस्तंगतसूर्यः (सूर्यास्त काल), एनसा - पापेन (पाप से)

**ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत्।**
**कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च।।3।।**

**अन्वयः** - ब्राह्मे मुहुर्ते बुध्येत धर्मार्थौ अनुचिन्तयेत् च, तन्मूलान् कायक्लेशान् वेदतत्त्वार्थम् एव अनुचिन्तयेत्।

**शब्दार्थौः** - कायक्लेशान् - शरीरकष्टान् (शरीर के कष्टों को), वेदतत्त्वार्थम् - ब्रह्मकर्मात्कम् (ईश्वरीय कर्म रूप)

**आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः।**
**माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः।।4।।**

**अन्वयः** - आचार्यः ब्रह्मणः मूर्तिः, पिता प्रजापतेः मूर्तिः, माता पृथिव्याः मूर्तिः, तु भ्राता स्वः आत्मनः मूर्तिः।

**यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम्।**
**न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि।।5।।**

**अन्वयः** - नृणाम् सम्भवे यं क्लेशं मातापितरौ सहेते तस्य निष्कृतिः वर्षशतै अपि कर्तुं न शक्या।

**शब्दार्थौ** - सहेते - सहनं कुर्वते (सहन करते हैं), निष्कृतिः - मुक्तिः(विमुक्ति)

**यथा खनन् खनित्रेण नरो वार्यधिगच्छति।**

**तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥6 ॥**

**अन्वयः** – यथा नरः खनित्रेण खनन् वारि अधिगच्छति तथा गुरुगतां विद्यां शुश्रूषुः अधिगच्छति।

**शब्दार्थः** – खनित्रेण – खननयन्त्रेण (खन्ति के द्वारा), अधिगच्छति – प्राप्नोति (प्राप्त करता है), गुरुगताम् – आचार्य स्थिताम् (गुरु के पास स्थित), शुश्रूषुः – सेवापरः (सेवा करने वाले, शिष्य)

**सर्वे तस्यादृताः धर्मा यस्यैते त्रय आदृताः।**

**अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥7 ॥**

**अन्वयः** – यस्य एते त्रयः (मातृपित्राचार्याः) आदृताः तस्य सर्वे धर्माः आदृताः। तु यस्य एते अनादृताः तस्य सर्वाः क्रियाः अफलाः।

**विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम्।**

**अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम् ॥8 ॥**

**अन्वयः** – विषात् अपि अमृतं बालात् अपि सुभाषितम् अमित्रात् अपि सद्वृत्तम् अमेध्यात् अपि काञ्चनम् ग्राह्यम्।

**शब्दार्थः** – अमेध्यात् – अशुद्धस्थानात् (अपवित्र स्थान से)

**शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम्।**

**न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा ॥9 ॥**

**अन्वयः** – यत्र जामयः शोचन्ति तत् कुलम् आशु विनश्यति, तु यत्र एताः न शोचन्ति तत् सर्वदा वर्धते हि।

**शब्दार्थः** – शोचन्ति – दुःखिन्यो भवन्ति (दुःखी होती हैं), आशु – शीघ्रम् (जल्दी), विनश्यति– नष्टं भवति (नष्ट होता है) जामयः – भगिनीपत्नीदुहितृस्नुषाद्या(बहिन, पत्नी, पुत्री आदि स्त्रियाँ)

**तस्मादेताः सदा पूज्याः भूषणाच्छादनाशनैः।**

**भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥10 ॥**

**अन्वयः** – तस्मात् एताः भूषणाच्छादनाशनैः नित्यं सत्कारेषु उत्सवेषु च भूतिकामैः नरैः सदा पूज्याः।

**शब्दार्थः** – भूतिकामैः – समृद्धिकामैः (समृद्धि की कामना करने वालों के द्वारा), भूषणाच्छादनाशनैः – आभूषण वस्त्रभोजनैः (गहने, वस्त्र, भोजनादि के द्वारा)

**अद्भिर्गात्राणि शुद्ध्यन्ति मनः सत्येन शुद्ध्यति।**

**विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति ॥11 ॥**

**अन्वयः** – गात्राणि अद्भिः शुद्ध्यन्ति, मनः सत्येन, शुद्ध्यति, भूतात्मा विद्यातपोभ्याम् (शुद्ध्यति) बुद्धिः ज्ञानेन शुद्ध्यति।

**शब्दार्थः** – गात्राणि – अङ्गानि (शारीरिक अङ्ग), अद्भिः – जलैः (पानी से) भूतात्मा – जीवात्मा

## अभ्यासः

1. **एकवाक्येन उत्तरत –**

(क) अमृतं कस्मात् ग्राह्यम्?

(ख) आचार्यः कस्य मूर्तिः भवति?

(ग) कस्मिन् मुहूर्ते बुद्ध्येत?

(घ) मनः केन शुद्ध्यति?

(ङ) गुरुगतां विद्यां कः अधिगच्छति?

2. **एकपदेन उत्तरत –**

(क) परं तपः कः?

(ख) माता कस्याः मूर्तिः?

(ग) बालात् अपि किं ग्राह्यम्?

(घ) मौनात् किं विशिष्यते?

(ङ) अमित्रात् किं ग्राह्यम्?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत –**

(क) कुलम् कथम् आशु विनश्यति?

(ख) कस्य सर्वाः क्रियाः अफला?

(ग) वर्षशतैरपि कस्य निष्कृतिः न भवति?

(घ) कः कस्य मूर्तिः?

(ङ) किं किं कुतः कुतः ग्राह्यम्?

4. **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) पिता प्रजापतेः मूर्तिः।

(ख) नरः खनित्रेण खनन् वारि अधिगच्छति।

(ग) परं ब्रह्म एकाक्षरम् अस्ति।

(घ) काञ्चनम् अमेध्यात् अपि ग्राह्यम्।

(ङ) गात्राणि अद्भिः शुद्ध्यन्ति।

**5. कोष्ठकात् चित्वा रिक्तस्थानानि पूरयत-**

(धर्मार्थौ, जामयः, माता, प्राणायामाः, बुद्धिः)

(क) यत्र...............न शोचन्ति।

(ख) ज्ञानेन..............शुद्ध्यति।

(ग) .............पृथिव्याः मूर्तिः

(घ) परं तपः...............।

(ङ) ............अनुचिन्तयेत्।

**6. अधोलिखितानां रूपाणि निर्देशपूर्वकं लिखत -**

| | | | | | | |
|---|---|---|---|---|---|---|
| (क) | पा | - | लृट्लकारः | मध्यमपुरुषः | - | त्रिषु वचनेषु |
| (ख) | चर् | - | लोट्लकारः | प्रथमपुरुषः | - | त्रिषु वचनेषु |
| (ग) | खाद् | - | विधिलिङ्लकारः | प्रथमपुरुषः | - | त्रिषु वचनेषु |
| (घ) | नय् | - | लट्लकारः | उत्तमपुरुषः | - | त्रिषु वचनेषु |
| (ङ) | पच् | - | लङ्लकारः | मध्यमपुरुषः | - | त्रिषु वचनेषु |

**7. भावविस्तारं कुरुत -**

(क) यथा खनन् खनित्रेण नरो वार्यधिगच्छति।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति।।

(ख) ब्राह्मे मुहूर्ते बुद्ध्येत धर्मार्थौ चानुचिन्तयेत्।
कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च॥

**8. नामनिर्देशपूर्वकं सन्धिविच्छेदं कुरुत -**

(क) वार्यधिगच्छति।

(ख) यस्यैते

(ग) विनश्यत्याशु

(घ) तद्धि

(ङ) सत्कारेषूत्सवेषु

**9. विलोमपदं मेलयत-**

| (अ) | (ब) |
|---|---|
| मौनः | निष्फलाः |
| सत्यम् | वाचालः |
| यथा | मन्दम् |
| सफलाः | तथा |
| आशुः | मिथ्या |

**10. अधोलिखितानां श्लोकानामन्वयं कुरुत -**

(क) एकाक्षरं परं.................मौनात्सत्यं विशिष्यते।

(ख) आचार्यो ब्रह्मणो..............स्वो मूर्तिरात्मनः।

(ग) शोचन्ति जामयो.............तद्धि सर्वदा।

(घ) अद्भिर्गात्राणि शुद्ध्यन्ति...............बुद्धिर्ज्ञानेन शुद्ध्यति।

(ङ) विषादप्यमृतं ग्राह्यं.............काञ्चनम्?

**11. अधोलिखितानां समस्तपदानां नामोल्लेखपूर्वकं समासविग्रहं कुरुत-**

(क) धर्मार्थौ

(ख) मनोर्मन्थनम्

(ग) भूतात्मा

(घ) भूतिकामैः

(ङ) अनादृताः

## योग्यताविस्तार : -

- श्लोकानां सस्वरगानं कुरुत।
- अन्यान् स्मृतिश्लोकान् कण्ठस्थं कुरुत।